तदसत्। 'ग्रामं गच्छति' 'त्यजती' त्यादौ द्वितीयादितः फलसामान्यलाभेऽपि नियतसंयोगविभागाद्यलाभात् फलविशेषावच्छिन्नव्यापारस्यैव धात्वर्थत्वात्। इतरथा 'त्यजि'—'गमि' प्रभृतीनां पर्यायत्वापत्तेः। तत्रापि 'गम्यते ग्राम' इत्यादौ ग्रामादेः संयोगादिशालित्वं कुत एव प्रतीयत इति चेत्—तदवच्छिन्नव्यापारवाचिधातुसमभिव्याहारादेव, यथा इष्टसाधनत्ववाचकात् विधेरेव स्वर्गकामादिसमभिव्याहारात् स्वर्गजनकत्वं प्रतीतिस्त्विष्टत्वं फलत्वत्वाभ्यां स्वर्गत्वसंयोगत्वाभ्यां चेत्यन्यदेतत्।

अस्तु वा बुद्धिस्थविशेषवाचकपदादेव व्युत्पत्तिवशादेव प्रकृत्यर्थतावच्छेदकफलं तच्छालिवाचककृतेरपि विशेषरूपेण बोधकत्वम्। अपि च धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं, न तु धात्वर्थजन्यफलशालितामात्रं गमिपत्योः कर्मत्वस्य पूर्वस्मिन् देशे त्यजेश्चोत्तरस्मिन् स्पन्देश्च पूर्वापरदेशयोः प्रसङ्गफलावच्छिन्नव्यापारबोधकत्वादेव धातूनां सकर्मकत्वव्यवहारः, आक्तस्तु जानातीत्यादेः तादृशधातुयोग एव च कर्मप्रत्ययाः, तत्र द्वितीयया अभिधेयत्वं अभिधीयते। तथाकाङ्क्षावैचित्र्यात् धात्वर्थतावच्छेदकफलेऽन्वेति। अत एवास्याः पदार्थान्विताभिधेयत्वबोधसम्प्रतीतो भेदः। अस्तु वा कर्माख्यातस्यैव द्वितीयायाः अपि फलमर्थस्तांवा फलव्यापारयोः पृथगेवार्थः, विशिष्टस्त्वन्यवलभ्यः। 'भूमिं प्रयाति' 'विहगो विजहाति महीरुहं' न तु स्वात्मानमित्यनुरोधात् क्रियात्वे परसमवेतत्वमपि कर्म प्रत्ययार्थः।

इयांस्तु विशेषः—यत्परत्वं सुपा प्रकृत्यर्थापेक्षिकं तिङादिना च स्वार्थफलाश्रयापेक्षिकं प्रत्याय्यते। 'पटं जानाति' 'इच्छति' 'कुरुते' 'चैत्रो मैत्रेण ज्ञायते', 'इष्यते' 'क्रियते पटः'

इत्यादौ सविषयपदार्थाभिधायिधातुप्रयोगे कर्मप्रत्ययेन यथायथं विषयित्वं कर्तृतिङाश्रयत्वं विषयत्वं तृतीयया आधेयत्वं वोध्यते। अन्वयबोधे त्वयं विशेषो यदेकत्र कर्तर्याश्रयत्वं तत्र क्रियाविषयिता तत्र कर्मविशेषणम्। अन्यत्र कर्मणि विषयता तत्र क्रिया तदाधेयत्वं तत्र च कर्तेति। ज्ञातो ज्ञाता नष्ट इत्यादौ च कर्मकर्तृकृता विषयाश्रयप्रतियोगिबोधकत्वं, यतते इत्यादौ यत्नत्वादिनोपस्थिते यत्नविषयत्वेन नान्वयः। अपि तु उद्देश्यत्वेन पदस्वाभाव्यात्। अत एव अभुञ्जानेऽपि भोजनाय यतते इत्यादयः प्रयोगाः।

धातोरर्थः फलम्। अनुकूलो व्यापारो व्यापारमात्रं वा आख्यातस्य जन्यजनकभावः संसर्गमर्यादालभ्यः। लडादिलिङाद्यर्थौ वर्तमानत्वादीष्टसाधनत्वादिकमेकपदोपात्तत्वप्रत्यासत्त्या तत्रैवान्वेति। भावप्रत्ययस्य घञादेरनुकूलो व्यापार एवार्थः। तेन व्यापारसत्त्वे फलानुत्पाददशायां पाको भविष्यतीति न प्रयोगः, न वा व्यापारविगमे फलसत्वेन पाको विद्यत इति, न वा घटभूतलयोः मिथस्संयोग इतिवन्मिथोगमनमित्यादि प्रत्ययोपनीतपरसमवेतव्यापारसमवेतव्यापारजन्यधात्वर्थफलशालित्वं कर्मत्वं फलनिष्ठं चाधेयत्वं द्वितीयादिना व्यापारनिष्ठं च तृतीयादिना अभिधायिते।

एवं च 'तण्डुलं पचति चैत्र' इत्यस्य तण्डुलवृत्तिफलविशेषजनकव्यापारवान् चैत्रः, 'मैत्रेण पच्यते तण्डुल' इत्यस्य च मैत्रनिष्ठव्यापारजन्यफलविशेषशाली तण्डुल इत्यर्थः। फलव्यापारयोः विशेषणविशेष्यभावभेदादेव कर्तृकर्मप्रत्ययव्यवहारः। जानातीत्यादौ तु उक्तैव रीतिः अनुसर्तव्या।

वस्तुतस्तु आख्यातस्य तृतीयाया अपि व्यापार एवार्थः। कर्माख्यातस्य धात्वर्थफलनिरूपितमधिकरणत्वं कर्मकृतः फलाश्रयः कर्तृकर्मसामानाधिकरण्यानुरोधात्। जानातीत्यादावुक्तैव रीतिरनुसर्तव्या। 'मैत्रेण पच्यते' 'पक्व' इत्यादौ सुबर्थ एव व्यापारे वर्तमानत्वाद्यर्थान्वयः। 'पचमानः पक्तवान्' इत्यादौ पुनरनायत्या पदार्थतावच्छेदक एव व्यापारे तदन्वयः, आस्तां व्यापाराश्रयौ शक्यौ विशिष्टमन्वयबललभ्यम्, एवकारस्यैवान्ययोगव्यवच्छेदौ अन्ययोगिप्रतियोगिकव्यवच्छेदस्यातिप्रसक्तत्वात्। अन्ययोगत्वावच्छिन्नप्रतियोगिकव्यवच्छेदस्य शक्यत्वे शक्याप्रसिद्धिः, बाधितं च, पार्थ एवेत्यादौ पार्थान्ययोगत्वावच्छिन्नव्यवच्छेदस्य अन्वयप्रसङ्गः। तस्य ततोऽन्यत्वात् स्वान्ययोगव्यवच्छेदत्वेन शक्यत्वे स्वत्वस्याननुगतत्वात् शक्त्यानन्त्यम्। तस्मात् यथा 'नीलो घटो नास्ती'त्यादौ नीलघटत्वावच्छिन्नस्यैव पार्थ एवेत्यादावपि पार्थान्ययोगत्वावच्छिन्नाभावस्यैव प्रतीतेः। समानं चेदं कृतौ कालान्वयवादिनां धात्वर्थानुकूलव्यापारविरहिणि महीरुहादौ संयुज्यते, संयुक्त इत्यादिव्यवहारात् संयोगवत्त्वमात्रप्रतीतेश्च न तत्र प्रत्ययस्य व्यापारवाचितेति न सकर्मकत्वम्। संयोग इत्यादौ तु अर्थमात्रप्रतीतेः घञादेः प्रयोगसाधुतेति मण्डन-

iii.

मतानुयायिनः । तन्न; पचतीत्यादौ पाकानुकूलवर्तमानयत्नाननुभवप्रसङ्गात् । फलानुकूलादृष्टवत्यपि पचतीत्यादिषु विभागानुकूलपूर्वसंयोगादिमति निश्चलादावपि त्यजतीत्यादेः प्रयोगस्य प्रसङ्गात् । तत्र तत्र तत्तत्फलानुकूलतत्तद्व्यापारविशेष एव धात्वर्थः । सर्वत्र धात्वर्थाश्रयत्वं कर्तृत्वं संख्यावर्तमानादिकं क्वचिदाश्रयादिकमपि आख्यातार्थं इति । गुरुमपि तत्र तत्र तादृशयत्नानुभवप्रसङ्गात् ध्येयमिति ।

इति शिरोमणिकृतः आख्यातवादः समाप्तः ॥

श्रीः

श्रीजयरामन्यायपञ्चाननविरचितः

* अन्यथाख्यातिवादः

(संपादकः— का. इ. गोविन्दाचार्यः)

अलौकिकप्रत्यासत्तिस्तु ज्ञानलक्षणा-सामान्यलक्षणा योगजधर्मभेदा (त्) त्रिधा। अथा-द्यस्य (द्यायाः) प्रत्यासत्तित्वे किं बीजमिति चेत् — इदं रजतमित्यादिस्मर्यमाणरजतान्यथाख्या-त्यनुपपत्तिरिति। अन्यथाख्यातौ किं प्रमाणमिति चेत् —

नत्वा शम्भोः पदाम्भोजं नानामतकदम्बिताम्।
अन्यथाख्यातिमाख्याति जयरामः समासतः॥

अन्यथाख्यातौ ज्ञानत्वं शुक्तिविशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्ववद्वृत्ति न वा इत्याद्याः विप्रतिपत्तयः। विधिप्रसिद्धिः इच्छात्वादौ निषेधस्य च द्रव्यत्वादेवेव (द्वावेव) सुलभेति।

अत्र नैयायिकाः। ज्ञानत्वं शुक्तिविशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्ववद्वृत्ति, शुक्ति-विशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्ववत्प्रवृत्तेः, समानविशेष्यतया जनकवृत्तित्वादिच्छात्ववदिति।

तत्र मीमांसकाः — नन्विदमप्रयोजकत्वं (कम्), इच्छावृत्तित्वं चोपाधिः। ज्ञानत्वं न तादृशवृत्ति, ज्ञानमात्रवृत्तिधर्मत्वात्, सर्वांशे प्रमात्ववदिति चेत् — न। शुक्तिविशेष्यकरजतत्व-प्रकारकप्रवृत्तेः तादृशज्ञानं विनाऽनुपपत्तेः। सत्यस्थले रजतत्वप्रकारकप्रवृत्तित्वावच्छिन्नं प्रत्येव रजतत्वप्रकारकज्ञानत्वेन समानविशेष्यतया कारणत्वकल्पनात्। अत एव नाप्रयोजकता, उपाधेश्च पक्ष एव साध्यव्यापकता। त्वदीयहेतुरप्रयोजकः।

ननु 'तद्धेतोरेव तदस्तु किं तेन?' इत्यादिन्यायात् विशिष्टज्ञानकारणतयाऽवश्याभ्युपेत-भेदाग्रहकारणत्वेनैवोपपत्तेः नाक्लृप्तमिथ्याज्ञानकल्पनं युक्तमिति चेत् न। सत्यस्थले पुरोवर्तिनि इष्टभेद(ग्र)हस्याप्रसिद्धौ तदभावाप्रसिद्धेः। प्रसिद्धौ (सिद्धे) वाऽन्यथाख्यातिः। अन्यत्र प्रसिद्धस्य रजतभिन्नप्रकारकज्ञानस्य विशेष्य(क)तासम्बन्धेनाभावस्तु रजते सर्वदैव विद्यमानत्वात् न विशिष्टज्ञानकारणं, असत्यस्थले विशिष्टज्ञानस्य चासिद्धौ कस्य हेतुतया भेदाग्रहावश्यकत्वं, सिद्धौ तु पाटच्चरविलुण्ठिते (वे)श्मनियामकजागरणवृत्तान्तानुसरणम्। न च मिथ्याज्ञानकल्पनागौरवं दोषः। फलानिर्णये गौरवस्यानिर्णयात्। शङ्का च (नै)व प्रतिबन्धिका। कथमन्यथा शाब्दादिग्रहे

* Tanjore Sarasvati Mahal Library MSS. B. No. 2280/D. 6591.

तत्र योग्यताविशिष्टज्ञानादिकारणत्वकल्पनम् । तत्रापि 'तद्धेतो'रिति न्यायात् । योग्यताद्य-संसर्गाग्रहस्यैव कारणत्वौचित्यात् । योग्यताविशिष्टज्ञानव्यक्तिकल्पने गौरवात् । तथा च योग्यत्वा-संसर्गाग्रहदशायां च कथं (त)वापि (पदा)र्थान्वयबोधादि ।

अथ क्वचिदनुभवसिद्धयोग्यताविशिष्टज्ञानस्यान्वयव्यतिरेकाभ्यां कार्यकारणभावग्रहो जाय-मानो लाघवादितः सामान्यत एव तं परिच्छिनत्तीत्यत्रापि योग्यताविशिष्टज्ञानं कल्प्यते फलमुख-गौरवस्यादोषत्वादिति चेत्– तुल्यं प्रकृतेऽपि ।

किं च पुरोवर्तिनि रजतभेदग्रहस्य रजतत्वात्यन्ताभावग्रहस्य रजतभेदे (द) रजतत्वा त्यन्ताभावयोः नानाविधव्याप्तिविशिष्टनानाविधव्याप्यवत्तानिश्चयस्य तयोरवच्छेदकत्वेन गृहीत-नानाविधधर्मवत्तानिश्चयस्य चाभावानामनन्यथासिद्धत्वकल्पनापेक्षया क्वचित् (क्ल) प्तपूर्ववर्तिता-कस्य विशिष्टज्ञानस्य नियमानन्यथासिद्धित्वकल्पनैवोचिता ।

अपि च भ्रमत्वेनाज्ञायमाने आनुमा (नि) करजतादिभेदग्रहे सत्यपि नयने रजतत्वादि-विशिष्टज्ञा (ना) त्प्रवृत्तेः व्यभिचारः । न चाभेदाग्रहकारणत्वादनातिप्रसङ्गः । तथा हि — पुरो-वर्तिनि भेदग्रहाभावमात्रस्य कारणत्वे रजते भे (ने) दं रजतमिति ज्ञानकालेऽपि प्रवृत्तिप्रसङ्गः ।

अथ स्वतन्त्रोपस्थितस्येष्टस्य भेदग्रहाभावो हेतुरिति चेत् – किं नाम स्वातन्त्र्यम्, भेदविशेषणत्वेनोपस्थितिरिति चेत् — एतद्रजतभिन्नं भूतलमिति ग्रहणात् स्मरणाद्वाऽप्रवृत्तिप्रसङ्गः । पुरोवर्तिवृत्तिभेदाविशेषणत्वेनोपस्थितिरिति चेत् – रजत एव नेदं रजतमिति ज्ञानेऽपि तत्सत्त्वात् प्रवृत्तिप्रसङ्गः । पुरोवर्त्यगृहीतासंसर्गकेष्टभेदग्रहाभावः कारणमित्यपि नम्युक्तौ (न युक्तम् .) 'इदं रजतं' 'घटो न रजत' मिति ज्ञानादप्रवृत्तिप्रसङ्गात् । न हि रजतभेदः शुक्तिगृहीता-संसर्गकोऽन्यथाख्यात्यापत्तेः ।

एतेन पुरोवर्तिनि ज्ञायमानेष्टभेदस्यासंसर्गाग्रहः प्रतिबन्धकः तदभावः कारणं रजत-भेदाग्रहदशायामपि शुक्तौ 'इदं रजतम्, इति ज्ञानात् प्रवृत्तेः विशिष्टाभावसम्पादनाय ज्ञायमानेति इति परास्तम् ॥

किं च यदा कदाचित् ज्ञायमानत्वमतिप्रसक्तं तदानीं ज्ञायमानत्वं चोपदर्शितस्थले । यदपि च पुरोवर्त्यगृहीतासंसर्गकेष्टभिन्नत्वप्रकारकज्ञानविषयत्वाभावः कारणमिति, तदपि न । तत्प्रकारकज्ञानविषयत्वाभावस्य पुरोवर्तिनिष्ठतया कारणत्वे रजत एव 'नेदं रजत'मिति ज्ञानेऽपि प्रवृत्तिप्रसङ्गात् । यत्किञ्चि (न्नि) ष्ठतया कारणत्वे च सुतरामतिप्रसङ्गात् । सर्वनिष्ठस्य कारणत्वे रजतशुक्तौ (क्ती) रजतारजत इति ज्ञानात् रजते प्रवृत्तिप्रसङ्गादिति सम्प्रदायः ।

अत्र ब्रूमः । पुरोवर्तिनि रजतभेदोपस्थितिविशिष्टरजतभेदासंसर्गग्रहः प्रतिबन्धकः तदभावः कारणं वैशिष्ट्यं च समवायेनोपस्थित्यधिकरणे एककालावच्छेदेन विशेषणताविशेषण वर्तमानत्वं, अतो न कालान्तरीयपुरुषान्तरीयरजतो त्भेदोपस्थितिमादाय दोषः । न वा तत्कालीनत्वोक्तिनिबन्धनाप्रसिद्धिः विशिष्टाभावस्योपस्थित्यभावकाले विशेषणाभावादेव सत्त्वात् । नच शुक्तौ 'इदं रजतं', 'घटो न रजत'मित्यत्र प्रवृत्तिप्रसङ्गः । रजतभेदग्रहप्रतिबन्धकदोषस्योत्तेजकत्वेन तदभावविशिष्टस्य प्रतिबन्धकत्वस्वीकारात् । रजतभेदानुपस्थितिदशायां शुक्ताविदं रजतमिति भ्रमकाले रजतभेदग्रहप्रतिबन्धकदोषाभावात् । रजतभेदासंसर्गस्य शुक्तौ ग्रहेऽन्यथाख्यात्यापत्त्या तदनुग्रहसत्त्वाच्च प्रवृत्तिः न स्यात ; अतो रजतभेदोपस्थितिविशिष्ट इत्युक्तम् । न च रजतभ्रमजनक एव दोष उत्तेजकोऽस्तु, किमनेन विशेषणेनेति वाच्यम् । तन्मते रजतभेदासंसर्गाग्रहः इत्यस्य पुरोवर्तिविशेष्यको यो रजतभेदासंसर्गग्रहः समवायेन तदभाव इत्यर्थो वाच्यः, तदैवोक्तोपस्थितिविशिष्टस्यात्मनिष्ठतया तदभावस्य कारणत्वसम्भवात् । तथा च शुक्तिरूपे पुरोवर्तिनि रजतभेदासंसर्गग्रहस्याप्रसिद्ध्या न तदभावस्य प्रतिबन्धकत्वमिति चेत् —

अस्तु तर्हि तत्पुरुषीयरजतभेदोपस्थित्या दोषविशेषविरहेण च विशिष्टस्य विशेष्यतया तत्पुरुषीयरजतभेदासंसर्गग्रहत्वावच्छिन्नाभावस्याभावीयविशेषणतया पुरोवर्तिनिष्ठतया तत्प्रतिबन्धकत्वम् । निरुक्ताभावस्य रजतभेदोपस्थितिवैशिष्ट्यं च स्वविषयभेदस्यासंसर्गग्रहप्रतियोगित्वमेककालीनत्वं चेति न कोऽपि दोषः ।

अथ तथापि पुरोवर्तिनि येन केनापि रूपेण यो रजतभेदासंसर्गग्रहः तदभावो वा पुरोवर्तितावच्छेदकरूपेण वा यो रजतभेदासंसर्गग्रहः तदभावो वा प्रतिबन्धकः । नाद्यः ; एकस्मिन्नेव रजते इदं न रजतं गृहवर्तिरजतमिति ज्ञानात् तत्र प्रवृत्तिप्रसङ्गात् । गृहवर्तित्वरूपेण रजतभेदासंसर्गग्रहस्य तत्र सत्त्वात् तदभावात् । न द्वितीयः, अप्रसिद्धेः, पुरोवर्तितावच्छेदकशुक्तिमात्रवृत्तीदंत्वावच्छेदेनासंसर्गग्रहस्यासम्भवादिति सत्यम् । विशेष्यतावच्छेदक (ता) सम्बन्धेन तत्पुरुषीयरजतभेदासंसर्गग्रहाभावस्य निरुक्तविशेषणविशिष्टस्य विशेष्यतावच्छेदकतासंबन्धेन तत्पुरुषीयरजतत्वप्रकारकप्रवृत्तिं प्रति प्रतिबन्धकत्वेनादोषात् । इत्थं च 'इमे रङ्गरजते' 'नेमे रङ्गरजते' इति विपरीतचतुष्के उपस्थितेष्टानिष्टभेदाग्रहसत्त्वेऽपि युगपत् प्रवृत्तिनिवृत्तिसम्भावना नास्ति तत्र रङ्गवृत्तीदन्त्वयोः रजतरङ्गभेदयोरसंसर्गग्रहस्य विशेष्यतावच्छेदकतयाऽभावात् ।

अथैवमपि निरुक्तक्रमेण पुरोवर्तिनिष्ठभेदे रजतप्रतियोगित्वासंसर्गाग्रहस्य रजते पुरोवर्तिनिष्ठभेदप्रतियोगित्वासंसर्गा (ग्र) हस्य रजतत्वात्यन्ताभावासंसर्गग्रहस्य एवमिष्टव्यावर्तकधर्मासंसर्गाग्रहस्याभावानामनन्यथासिद्धत्वकल्पनामपेक्ष्य (क्लृप्त) पूर्ववर्तिताकस्य विशिष्टज्ञानस्यैव नियमानन्यथा

सिद्धत्वकल्पना लघीयसी, कारणतावच्छेदकस्य शीघ्रोपस्थितिकत्वात् लाघवाच्चेति चेत् — न । तव मिथ्याज्ञानकल्पने तत्र तेषां नियमानन्यथासिद्धत्वकल्पनावश्यकत्वात् । विशिष्टज्ञानं प्रति भेदग्रहादिसामग्र्या अपि प्रतिबन्धकत्वात् अन्यथा भेदे (द) ग्रहकाले विशिष्टज्ञा (ना) पत्तेः । मम तु शुक्तिवृत्तीदन्त्वाद्यवच्छिन्ने रजतत्वप्रकारकज्ञानाभावात् तत्स्थानाभिषिक्तप्रवृत्तावेव तेषां (हे) तुत्वमिति ।

वस्तुतस्तु इष्टं रज ...... (इष्टरजता) द्भेदासंसर्गः तद्भेदाभावो रजतं रजतत्वं च तद्ग्रहाभावः । रजतरजतत्वान्यतरग्रहाभावः तादात्म्येन र (ज) तग्रहाभावविशिष्टसमवायेन रजतत्वग्रहाभावः प्रतिबन्धक इति फलितम् । इष्टभेदानुपस्थितिदशायामपि रजते रज (त) त्वज्ञाने रजतत्वरूपासंसर्गग्रहसत्त्वात् तदभावो नेति न ज्ञायमानत्वनिवेशोऽपि । इत्थं च शुक्तिदोषकाले प्रवृत्तिसम्पादनाय दोषस्योत्तेजकत्वम् । न च रजतभेदानुपस्थितिदशायां शुक्ताविदं रजतमिति ज्ञानकाले दोषाकल्पने मानाभावात् तदा प्रवृत्तिः न स्यादिति वाच्यम् । दोषाणां तत्तत्कालीनशुक्तिज्ञानानामप्युत्तेजकत्वात् । इत्थञ्च तत्तच्छुक्तिज्ञानाभावविशिष्टस्य तदुपनयाभावस्याभावः कारणम् । इत्थञ्च तत्तच्छुक्तिज्ञानस्य दोषस्य रजत(त)त्वज्ञानस्य च कारणत्वं पर्यवसितमिति नानुगमशङ्कापि पूर्वोक्तनिखिलसंसर्गाग्र ह)काले चैतेषामन्यतमस्यासत्त्वादेव न कार्यापत्तिः । रजतत्वज्ञानाद्रजतभेदस्य दोषाग्रहे प्रवृत्त्यापादनं च समानमिति । अथवा शुक्तिवृत्तीदन्त्वावच्छिन्ने प्रवृत्तौ दोषस्यैव कारणत्वं, रजतादिवृत्तीदन्त्वावच्छिन्ने प्रवृत्तौ विशिष्टज्ञानस्येति ।

अथ दोषस्येन्द्रियभेदेन च भिन्नत्वेनाननुगमात् न शुक्तिवृत्तीदन्त्वावच्छिन्नविशेष्यफल- (विशेष्यकप्र)वृत्तित्वावच्छिन्ने कारणत्वसम्भवो व्यभिचारात् । मण्डूकवसाञ्जनरूप-नयनां दोषत्व- (नयनदोषात्) त्वचा उरगभेदनिश्चयेऽपि प्रवृत्त्यापत्तेश्च, मम चाक्षुषत्वाच्च (त्वाच) भ्रमविशेषत्वाद्यवच्छिन्ने तेषां हेतुतेति न व्यभिचारः । किं च दोषाणां भ्रमहेतुत्वं नोच्यत एव, परन्तु रजतभेदग्रहादिप्रतिबन्धकत्वम् । तच्च तव मतेऽपि (मतेऽपि) समानं, रजतादिभ्रमस्त्वसंसर्गाग्रहादिरूपसामग्रीत एव जायते । इत्थञ्च प्रवृत्तौ तत्रारजतभेदाग्रह एव हेतुः, नानाविधाननुगतदोषाणां हेतुत्वकल्पनेऽप्यतिगौरवमिति चेत् — एवमप्यस्तु शुक्तिवृत्तीदन्त्वाद्यवच्छिन्नोपादाना(न)ताकरजतादिसाध्यताकप्रवृत्तौ रजतभेदाग्रह एव हेतुः तद्धर्मावच्छिन्ने रजतत्वविशिष्टज्ञानकल्पने तत्र तव (त)द्धेतुतावश्यकत्वात् । रजतं द्र(इ)ष्टसाधनमिति ज्ञानस्य रजतसाध्यताकप्रवृत्तौ हेतुत्वाच्च तत्रेष्टज्ञानकारणत्वलाभः । पुरोवर्तिज्ञानत्वेन कारणत्वं कल्प्यते । पुरोवर्ति-विशिष्यकरक (विशेष्यकरजत)ज्ञानत्वेन कारणत्वे विशेष्यविशेषणभावे विनिगमकाभावात् कार्यकारणभावद्वयं गौरवं च भवताम् । रजतवतीदन्त्वाद्यवच्छिन्ने रजतार्थिप्रवृत्तौ च भवतामिव विशिष्टज्ञानमेव हेतुरस्त्विति ।

अथ तथापि शुक्तिरजतसाधारणेदन्त्वाद्यवच्छिन्नविशेष्यकप्रवृत्तित्वावच्छिन्ने का गतिः? न च तत्रापि तादृशेदन्त्वरूपेण शुक्तिविशेष्यकप्रवृत्तौ भेदाग्रहो र(ज)तविशेष्यकप्रवृत्तौ च विशिष्टज्ञानं हेतुरिति वाच्यम्। विशेष्यविशेषणभावभेदेन कार्यकारणभावभेदे विशेष्यस्य कार्यतावच्छेदकेन विशिष्ट(विशेषणे) गौरवादिति चेत्—मोकं (मैवम्) रजतशुक्तिसाधारणेदन्त्वाद्यवच्छिन्नविशेष्यकतादृशप्रवृत्तित्वावच्छिन्ने रजतभेदग्रहस्य तद्धर्मावच्छिन्नविशेष्यकस्य शुक्तौ प्रसिद्धस्यैवा-त्तावः (भावः) कारणम्। न चैवं रजते नेदं रजतमिति ज्ञानेऽपि प्रवृत्तिप्रसङ्गः। रजतत्वग्रहप्रतिबन्धकदोषस्यैव प्रवृत्तावपि प्रतिबन्धकत्वात्। न च गौरवं, रजतविशेष्यकर(ज)तत्वप्रकारकत्वस्यैव प्रतिबध्यतावच्छेदकत्वात। [1](न च गौरवं, रजतविशेष्यकर(ज)तत्वप्रकारकत्वस्यैव प्रतिबध्यतावच्छेदकत्वात्)। न चाञ्जनरूपदोषसत्त्वेऽपि त्वाचवंशत्वप्रमोदयात् चाक्षुषत्वस्य प्रतिबध्यतावच्छेदके प्रवेशः आवश्यक इति वाच्यम्। दोषत्त्रस्या-जन(ज्ञन)कालीन तज्ज्ञानावेव (तज्ज्ञान एव) उपगमात्।

वस्तुतस्तु पूर्वोक्तासंसर्गाग्रहभावानां रजतशुक्तिसाधारणेदन्त्वावच्छिन्ने भेदाग्रहस्य च तादृशविशिष्टविषयकत्वमेव ज्ञानप्रवृत्तिसाधारणं कार्यतावच्छेदकम्। तत्र च नायनवंशभेदासंसर्गाग्रहत्वाचवंशत्वप्रमोदये त्वाचसन्निकर्षस्योत्तेजकत्वात् नानुपपत्तिः। वंशभेदाग्रहस्तु तप्र(तत्र)तिष्ठत्येव वंशेऽन्यथाख्यात्यभावादिति नोत्तेजकापेक्षा। यदि चेदंग्रहाभाव एव कार्यसहभावेन कारणम्, न तु तत्सामग्र्यभाव इति विभाव्यते तथापि न क्षतिः, भेदाग्रहस्य कारणत्वकल्पनयाऽपि प्रवृत्तिनिर्वाहस्य सम्पादितत्वात्।

ननु रजतशुक्तिसाधारणेदन्त्वावच्छिन्ने प्रवृत्तौ क्वचिदनुभव-सिद्धि(द्ध) विशिष्टज्ञानस्यान्वयव्यतिरेकानुविधानात् सामान्य(त)स्तत्र विशिष्टज्ञानत्वेनैक(का)रणत्वकल्पने मिथ्याज्ञानकल्पनं, तदनुरुद्धकार्यकारणभावकल्पनं च फलमुखत्वात् न दोषायेति चेत्—न तत्रान्वयव्यतिरेकानुविधानस्यैवासिद्धेः। न हि तादृशेदन्त्वावच्छिन्ने रजतत्वप्रकारकत्वावच्छिन्नं प्रत्येव विशिष्टज्ञानस्य साधारण्येन (... प्र?) कारणभेदाग्रहादिसत्त्वे विशिष्टज्ञानव्यतिरेकात् क्वचिदपि कार्यव्यतिरेक इति मीमांसकमतनिगर्वः।

अत्र सिद्धान्तयामः। भेदग्रहसत्त्वेऽप्याहार्यप्रत्यक्षोद(ये) ना(ना)हार्यत्वस्य प्रतिबध्यतावच्छेदके प्रवेश आहार्यबुद्धाविच्छायाः स्वातन्त्र्येण कारणत्वकल्पने गौरव(वादि)च्छायाः उत्तेजकत्वमेवोच्यत इति मते भेदे(द)ग्रहाभावस्यानुमितित्वशाब्दत्वप्रत्यक्षत्वाद्यवच्छिन्नं प्रत्येव कारणत्वात् नानुगतरूपेण प्रवृत्तिसाधारण्येन कार्यत्वसंभव इति स्वातन्त्र्येणा(ण) प्रवृत्तौ भेदाग्रहस्य कारणत्वं

1. कुण्डलितग्रन्थः प्रमादेन पुनः लिखित इति भाति।

वाच्यम् । तथा च लाघवाद्य(द) विशिष्टज्ञानस्यैव कारणत्वं कल्प(ल्प्य)त इति विसंवादिप्रवृत्त्यनुरोधात् मिथ्याज्ञानसिद्धिः ।

ननु कारणबाधेन मिथ्याज्ञानस्य बाधात् न तत्कारणस्य संभव इति चेत — मैवम् । प्रत्यभिज्ञाया इव संस्कारेन्द्रियाभ्यां तस्योत्पत्तेः संभवेन बाधविरहात । अप्रत्यभिज्ञायाः तत्तांशे स्मृतित्वोपगमात् स्मृतित्वावच्छेदेनैव संस्कारस्य कारणत्वकल्पनात् मम जातेर(व्या)प्यवृत्तित्वस्य साङ्कर्यस्य चादोषत्वात् तत्सम्भवेऽपि त्वन्नयेन तत्सम्भव इति चेत् त्वन्नयेनैव कारणबाधस्य निराकरणेनान्यथाख्यातिसाधनसम्भवात् । तथापि नैयायिकसिद्धान्तविरोधेनान्यथाख्यतिसाधनं न भवतीति चेत् — न । मयापि तत्र संस्कारस्यैव प्रत्यासत्तित्वोपगमात् स्मृतिसाधारणरजतत्वप्रकारकत्वावच्छिन्न एव हि तस्य कारणत्वम्, अनुभवस्यैव व्यापारत्वात स्मृतित्वघटिते कारणत्वादिरजतमिति प्रत्यक्षमिति सामग्रया स्मृतिप्रतिबन्धकत्वाच्च न तदा स्मरणम् । संस्कारजन्यज्ञानमात्र-एव चोद्बोधकस्य कारणत्वा(त्?) उद्बुद्धसंस्कारात् तदापत्तिः । प्रमाणान्तरासहकृतसंस्कारजन्यत्वस्य स्मृतित्वे नियामकत्वाच्च न तत्र तदापत्तिः, किंचिज्जातित्वादिना रजतत्वादिज्ञाने रजतमित्याकारकज्ञानानुदयात् बहुशः तदापादकस्य प्रदर्शनात् रजतत्वांशे निरवच्छिन्नरजतत्वप्रकारताकेऽनुभवे वा कारण-भाव(त्वमाव)श्यकं, तत एव भ्रमोत्पत्तिरिति न बाधसंभावनापि । [1](ज्ञानादिनिष्ठनिरवच्छिन्नविषयताकम् ?) ।

ननु तथापि रजतविषयकप्रत्यक्षत्वावच्छेदेनैव रजतेन्द्रियसन्निकर्षस्य हेतुत्वात् कथं तं विना रजतप्रत्यक्षमिति चेत् — न । मीमांसकमते ज्ञानमात्रस्यैव मितिमात्रंशे प्रत्यक्षत्वेन रजतविषयकप्रत्यक्षे रजतानुमित्यादौ, वेदान्तिमते च रजताभावप्रत्यक्षे रजतविषयके, सर्वमते च रजतादिस्वरूपसंबन्धविष(य)के रजतप्रत्यक्षे रजतेन्द्रियसन्निकर्षस्याहेतुत्वात् रजतविशेष्यकचाक्षुषादावेव तद्धेतुत्वोपगमात् । न चाभेदारोपे रजतत्वांशे रजतस्य विशेष्यत्वात् स एव दोषः मुख्यविशेष्यत्वस्य प्रवेशे च गौरवम्, अभेदारोपेऽपि स्वाश्रयतादात्म्यसंसर्गेण रजतत्वस्यैव प्रकारत्वात् । न च तथापि रजतत्वदंशं त (द्वि) षयः । समवायस्वाश्रयतादात्म्यान्यतरसंसर्गेण रजतत्वांशे निरवच्छिन्नप्रकारकरजतमित्याकारकज्ञानस्योत्पत्तिः(त्तेः) । कालिकादिसंबन्धेनैव रजतत्वांशे सप्रकारकज्ञानस्योदयात् । अत एव प्रवृत्ताविदन्त्वावच्छिन्नविशेष्यतानिरूपितरजतत्वनिष्ठनिरवच्छिन्नप्रकारताशालिज्ञानत्वेनैव कारणत्वम्, तादात्म्यारोपसंसर्गारोपसाधारणमिति मिश्राः । न च प्रात्यक्षिकबुद्धौ कथञ्चित्सम्भवेऽपि 'इदं रजतमि'ति शाब्दबोधे एकदेशस्य रजतत्वस्यान्यत्र कथमन्वय इति वाच्यम् । स्वाश्रयतादात्म्यसम्बन्धेन रजतत्वप्रकारकान्वयबोधे एकदेशतयोपस्थितेरेवाकाङ्क्षानिर्वाहकत्वादिति ।

---

1. कुण्डलितपंक्तिरत्र न घटते ।

शिवस्य बन्धिनी यस्मात्तस्मात्तत्सदृशं न हि ।

यानीह पुण्यानि शिवप्रियाणि
कृतानि नान्येव च तत्र भूमौ ।
क्षणं क्षणार्धं निमिषं तदर्धं
वासं च कृत्वा सुखमेति तीर्थे ॥

तस्मात्तत्कूपतीर्थं च पश्येन्नित्यमतन्द्रितः ।
सर्वसौभाग्यसंपत्तिर्भविष्यति शिवाश्रयात् ॥

॥ इति श्रीशैवपुराणे एकादशरुद्रसंहितायां उपरिभागे क्षेत्रखण्डे कालागस्त्यवनमाहात्म्ये
तीर्थावरणं नाम पञ्चपञ्चाशोऽध्यायः ॥

पाद्मेपुराणे मन्त्रसिद्धिक्षेत्रकल्पे -

सूत :-

इत्थं लक्ष्मीस्तपस्तेपे विष्ण्वर्थं मुनिसत्तमाः ।
तस्मात्क्षेत्रवरं पुण्यं तन्नाम्ना प्रथितं भुवि ॥

लक्ष्म्याः घटस्तनपयोवर्धितं विपिनं यतः ।
तस्माल्लक्ष्मीवनं नाम्ना विख्यातं तज्जगत्त्रये ॥

कमलार्थं बृहद्वीचिः वहिभूर्तोऽम्बुदध्वनिः ।
ततो वहिर्बृहत्सिन्धुनाथः संज्ञात विश्रुतः ॥

विवाह मङ्गळं ह्यत्र पुरे श्रीकृष्णयोरभूत् ।
श्रीकृष्णमङ्गलं नाम तस्मादस्य पुरस्य वै ॥

नियतं मङ्गलकरं कृष्णस्यापि महत्पुरम् ।
ततस्तु प्रथितं लोके कृष्णमङ्गळमित्यपि ॥

बाध्यम् । तथा च लाघवाद्य (द) विशिष्टज्ञानस्यैव कारणत्वं कल्प (ल्प्य) त इति विसंवादि-प्रवृत्त्यनुरोधात् मिथ्याज्ञानसिद्धिः ।

ननु कारणबाधेन मिथ्याज्ञानस्य बाधात् न तत्कारणस्य संभव इति चेत्—मैवम् । प्रत्यभिज्ञाया इव संस्कारेन्द्रियाभ्यां तस्योत्पत्तेः संभवेन बाधविरहात् । अप्रत्यभिज्ञायाः तत्तांशे स्मृतित्वोपगमात् स्मृतित्वावच्छेदेनैव संस्कारस्य कारणत्वकल्पनात् मम जातेर(व्या)प्यवृत्तित्वस्य साङ्कर्यस्य चादोषत्वात् तत्सम्भवेऽपि त्वन्नयेन तत्सम्भव इति चेत् त्वन्नयेनैव कारणबाधस्य निराकरणेनान्यथाख्यातिसाधनसम्भवात् । तथापि नैयायिकसिद्धान्तविरोधेनान्यथाख्यातिसाधनं न भवतीति चेत्—न । मयापि तत्र संस्कारस्यैव प्रत्यासत्तित्वोपगमात् स्मृतिसाधारणरजतत्व-प्रकारकत्वावच्छिन्न एव हि तस्य कारणत्वम्, अनुभवस्यैव व्यापारत्वात् स्मृतित्वघटिते कारणत्वादि-रजतमिति प्रत्यक्षमिति सामग्र्या स्मृतिप्रतिबन्धकत्वाच्च न तदा स्मरणम् । संस्कारजन्यज्ञानमात्र-एव चोद्बोधकस्य कारणत्वा(त्?) उद्बुद्धसंस्कारात् तदापत्तिः । प्रमाणान्तरासहकृतसंस्कार-जन्यत्वस्य स्मृतित्वे नियामकत्वाच्च न तत्र तदापत्तिः, किंचिज्जातित्वादिना रजतत्वादिज्ञाने रजतमित्याकारकज्ञानानुदयात् बहुशः तदापादकस्य प्रदर्शनात् रजतत्वांशे निरवच्छिन्नरजतत्व-प्रकारताकेऽनुभवे वा कारण-भाव(त्वभाव)द्वयकं, तत एव भ्रमोत्पत्तिरिति न बाधसंभावनापि । [1] (ज्ञानादिनिष्ठनिरवच्छिन्नविषयताकम्?) ।

ननु तथापि रजतविषयकप्रत्यक्षत्वावच्छेदेनैव रजतेन्द्रियसन्निकर्षस्य हेतुत्वात् कथं तं विना रजतप्रत्यक्षमिति चेत्—न । मीमांसकमते ज्ञानमात्रस्यैव मितिमात्रांशे प्रत्यक्षत्वेन रजतविषयक-प्रत्यक्षे रजतानुमित्यादौ, वेदान्तिमते च रजताभावप्रत्यक्षे रजतविषयके, सर्वमते च रजतादि-स्वरूपसंबन्धविष(य)के रजतप्रत्यक्षे रजतेन्द्रियसन्निकर्षस्याहेतुत्वात् रजतविशेष्यकचाक्षुषादावेव तद्धेतुत्वोपगमात् । न चाभेदारोपे रजतत्वांशे रजतस्य विशेष्यत्वात् स एव दोषः मुख्यविशेष्यत्वस्य प्रवेशे च गौरवम्, अभेदारोपेऽपि स्वाश्रयतादात्म्यसंसर्गेण रजतत्वस्यैव प्रकारत्वात् । न च तथापि रजतत्वदर्शं त (द्वि) षयः । समवायस्वाश्रयतादात्म्यान्यतरसंसर्गेण रजतत्वांशे निरवच्छिन्नप्रकारकरजत-मित्याकारकज्ञानस्योत्पत्तिः(त्तेः) । कालिकादिसंबन्धेनैव रजतत्वांशे सप्रकारकज्ञानस्योदयात् । अत एव प्रवृत्ताविदन्त्वावच्छिन्नविशेष्यतानिरूपितरजतत्वनिष्ठनिरवच्छिन्नप्रकारताशालिज्ञानत्वेनैव कारण-त्वम्, तादात्म्यारोपसंसर्गारोपसाधारणमिति मिश्राः । न च प्रात्यक्षिकबुद्धौ कथञ्चित्सम्भवेऽपि 'इदं रजतमि'ति शाब्दबोधे एकदेशस्य रजतत्वस्यान्यत्र कथमन्वय इति वाच्यम् । स्वाश्रयतादात्म्य-सम्बन्धेन रजतत्वप्रकारकान्वयबोधे एकदेशतयोपस्थितेरेवाकाङ्क्षानिर्वाहकत्वादिति ।

---

1. कुण्डलितपंक्तिरत्र न घटते ।

प्राप्य स्कन्दगिरिं रम्यं प्रणम्य गुहमव्ययम् ।
तत्र तस्थुः ससन्तोषाः संप्राप्तदनुग्रहाः ॥

॥ इत्यादिमहापुराणे श्रीस्कान्दे शङ्करसंहितायां शिवरहस्यखण्डे देवकाण्डे साम्प्रतम ... ... ॥

ब्रह्मकैवर्तके – वेदारण्यमाहात्म्ये :–

ऋषयः

वेदारण्ये विटङ्केशसमागमनकारणम् ।
पालयन्तो महाभीता विष्णुं च शरणं ययुः ॥

विष्णुं प्रचोदिता देवाः साकेतनगराधिपम् ।
मुचुकुन्दो महात्मानं युद्धाय समयान्वयन् ॥

तथास्त्विति स राजापि राज्यरक्षार्थमात्मजम् ।
स्थापयित्वाऽश्वसंयुक्तं आरुरोह रथं ततः ॥

गजैश्वरथसङ्घैश्च पत्तिभिश्च स सम्युतः ।
युयुत्सुरासुरैः साकं देवसैन्यवृतो ययौ ॥

असुरेन्द्रपुरीं प्राप्य रुरोध सह सैनिकः ।
विषाणध्वनिभिः सर्वा दिशश्च समपूरयत् ॥

अश्वा जहृषिरे तत्र गजाश्चापि बवृंहिरे ।
जगर्जुः पत्तिसङ्घाश्च रथसङ्घाश्च सस्वनुः ॥

एतान् शब्दान् समाकर्ण्य दृष्ट्वा च पुररोधनम् ।
चतुरङ्गबलोपेता दानवाश्चाभिनिर्ययुः ।
असुरागमनं दृष्ट्वा देवाः प्रत्युद्ययुस्तदा ॥

देवानामसुराणां च तुमुलं रोमहर्षणम् ।
अन्योन्यसङ्कुलं युद्धं बभूवातिभयङ्करम् ॥

एतस्मिन्नन्तरे देवाः असुरैश्चातिहिंसिताः ।
भग्नाः भिन्नाश्च ते सर्वे दिगन्तान्संप्रपेदिरे ॥

देवसैन्यं द्रुतं दृष्ट्वा मुचुकुन्दः प्रतापवान् ।
दैत्यान् जघान विशिखैः मण्डलीकृतकार्मुकः ॥

बाहून् चकर्त केषाञ्चिदुरूनकरिकरोपमान् ।
शिरांसिश्च पातयामास केषाञ्चिद्विशिखैः शितैः ॥

गजांश्च स गजारोहान् साश्वारोहान्हयांस्तदा ।
ससारथीन्नृपांश्चापि ममाथ निशितैः शरैः ।
प्रधानानसुरांश्चापि पट्टिसैर्निजघान सः ॥

पत्तींश्च निशितैर्भल्लैः अनयद्यमसादनम् ।
एवं तद्विष्णुवीर्येण मुचुकुन्देन बाधितम् ॥

भग्नमासीत्तदा सैन्यं आसुरं गतनायकम् ।
हतेषु दैत्यवर्येषु शङ्खं दध्मौ नृपस्तदा ॥

ततः सङ्खध्वनिं श्रुत्वा सेन्द्र देवाः समाययुः ।
दैत्यसैन्यं हतं दृष्ट्वा मुचुकुन्देन निर्जराः ॥

प्रशशंसुः नरेन्द्रं तं आलिलिंग्युः परस्परम् ।
आशीर्भिरभिनन्द्यैनं सरथं द्विपसैनिकम् ॥

समानिन्युर्दिवं देवाः मुदा परमया सह ।
प्रादर्शयन्पुरीं तस्य साट्टगोपुरतोरणाम् ॥

मुचुकुन्दस्ततो दृष्ट्वा पुरीं तां अमरावतीम् ।
तद्दर्शनजसन्तोषात्पुरीं विस्मृतवान्निजाम् ॥

तस्य हस्तं सामालम्ब्य देवेन्द्रस्स्वेन पाणिना ।
प्रवेश्य स्वगृहं रम्यं दर्शयामास सर्वतः ॥

ततो नन्दनसंज्ञं तु सर्वर्तुफलसंयुतम् ।
मन्दारैः पारिजातैश्च चन्दनैर्हरिचन्दनैः ॥

अशोकैश्चम्पकैस्तालैः हिन्तालैरर्जुनैरपि ।
पाटलैर्मल्लिकाभिश्च मालतीभिश्च शोभितम् ॥

सर्वर्तुफलपुष्पाढ्यैरेवं बहुविधैर्द्रुमैः ।
दर्शयामास देवेन्द्रो राज्ञे नन्दनमुत्तमम् ॥

नन्दनस्य तु मध्ये तु देवालयमदर्शयत् ।
मुचुकुन्दाय तन्मध्ये देवं सिंहासने स्थितम् ॥

नागाभरणसंयुक्तं नागयज्ञोपवीतिनम् ।
नीलकण्ठमुमाकान्तं चन्द्रार्धकृतशेखरम् ॥

तं दृष्ट्वा नन्दने देवं मुचुकुन्दो महामतिः ।
पुलकाङ्कितसर्वाङ्गो जातः साकेतभूपति ॥

देवं मह्यं ददस्वेति देवेन्द्रं समयाचत ।
दृष्ट्वा देवस्य सौन्दर्यं पुनःपुनरयाचत ॥

दातुं मनसि नेच्छासीत् देवेन्द्रस्य तदानघ ।
अस्मिन्देवेन्द्र प्रीत्या मे देवोऽसौ दीयतां मम ॥

प्रार्थयामास देवेन्द्रं मुचुकुन्दं पुनःपुनः ।
श्वोऽहं दास्यामि देवेशं विटङ्केशं नृपोत्तम ॥

उदीर्य तेन सार्धं सः प्रविवेश गृहं निजम् ।
उपाचाराच्च राजेन्द्रं वासोभूषणमौक्तिकैः ॥

सस्मार विश्वकर्माणं शचीभर्ता तदनन्तरम् ।
स्मरणानन्तरं सोऽपि समायातस्तदन्तिकम् ॥

इन्द्रस्तमागतं वीक्ष्य रहसीदमभाषत ।
एतद्विटङ्कसदृशं क्रियतां विग्रहान्तरम् ॥

त्वयेत्याज्ञापितस्त्वष्टा चकार प्रतिमान्तरम् ।
इन्द्रस्तां प्रतिमां तत्र स्थापयामास चालये ॥

अन्यत्र स्थापयामास पूर्वां तु प्रतिमां तदा ।
ततो नृपं समाहूय निर्जरेन्द्रोऽभ्यभाषत ॥

आलयं तु प्रविश्य त्वं विटङ्केशं प्रगृह्य च ।
अयोध्यां प्रति निर्याहि मा विलम्बोऽस्तु भूपते ॥

इत्युक्तो नृपतिः शीघ्रं प्रतिमान्तिकमभ्यगात् ।
पूर्ववत्पुलको नाऽस्य समभूत्तस्य दर्शनात् ॥

आगत्य देवराजस्य समीपं नृपतिर्जगौ ।
नैषा तु पूर्वा प्रतिमा सैव चानीयतां मम ॥

अथान्यानपि पञ्चैवं कारयित्वा शचीपतिः ।
क्रमेण दर्शयामास एकैकं नृपतेस्तदा ॥

न स्वीचकार नृपतिस्तानि पञ्च द्विजोत्तमाः ।
नूतनाः प्रतिमाः सर्वास्ततो देवपतिस्स्वयम् ॥

निधायान्यत्र पूर्वं तु प्रतिमां पूर्ववच्छुभाम् ।
आलये स्थापयित्वैनां पश्चाद्राजानमाह्वयत् ॥

पश्य राजन्विटङ्केशं अत्यन्ताद्भुतविग्रहम् ।
इत्युक्तो मुचुकुन्दस्तु विटङ्केशं ददर्श सः ॥

अयमेव हि देवेन्द्र देवो दृष्टो मया पुरा ।
अपि सन्दर्शनान्मेऽद्य पुलकानि भवन्ति हि ॥

एवं ददस्व भद्रं ते विटङ्केशं शचीपते ।
एवमुक्तो बलारातिः नृपेण प्रीतिमानसः ॥

ददौ सर्वविटङ्कानि तस्मै राज्ञे दिवस्पतिः ।
राजन्सर्वविटङ्कानि स्थापय त्वं हि भूतले ॥

इत्युक्तो देवराजेन अनुज्ञातश्च भूपतिः ।
तानि सर्वविटङ्कानि रथमारोप्य हर्षितः ॥

आशीर्भिः देववृन्दैस्तु तोषितः स्वपुरीं ययौ ।
सेनापति वृतो राजा वन्दिभिश्चापि संस्तुतः ॥

अयोध्यां प्राप्य राजेन्द्रः कञ्चित्कालमुवास सः ।
गते कतिपये काले मुचुकुन्दोऽतिधार्मिकः ॥

विटङ्कस्थापनार्थाय पुण्यस्थलमदर्शत ।
पुराणैस्स विनिश्चित्य पुण्यं वै कमलालयम् ॥

तत्र संस्थापयामास विटङ्कं प्रथमं नृपः ।
वेदारण्यस्य माहात्म्यं परिज्ञाय नृपोत्तमः ॥

द्वितीयं तु वेटङ्केशं स्थापयामास तत्र सः ।
तृतीयं स्थापयामास कायारोहणसंज्ञिके ॥

श्रीसुन्दरनदीस्थाने चतुर्थमपि वै द्विजाः ।
विटङ्कं स्थापयामास लोकानां ऋद्धिहेतवे ॥

अन्यान्यपि विटङ्कानि पुण्यस्थानेषु भूपतिः ।
अन्येषु स्थापयित्वा स्वं कृतकृत्यममन्यत ॥

एवं संस्थापिता राज्ञा विटङ्केशास्तपोधनाः ।
सप्तस्वपि (स्थापितेषु) विटङ्केषु स्थितेषु स नृपोत्तमः ॥

वेदारण्यविटङ्केशं भक्त्या वै सेवते मुहुः ।
एनं खलु विटङ्केशं देवेन्द्रोपि दिने दिने ॥

वेदारण्यस्य माहात्म्याद्भक्तियुक्तो निषेवने ।
विटङ्कप्रतिमां चापि कमलालयवासिनीं ॥

अनादृत्यैव गिरिशो वेदारण्यस्य वैभवात् ।
मनसा प्रतिमामेनां बहुधा बहुमन्यते ॥

तस्मादेनं विटङ्केशं ये तु पश्यन्ति मानवाः ।
ते विटङ्केशसायुज्यं प्राप्नुवन्ति न संशयः ॥

तस्मात्सर्वप्रयत्नेन गन्तव्यं वेदकाननम् ।
अन्यथा हि मनुष्याणां जन्म नूनं वृथाभवेत् ॥

बहुनात्र किमुक्तेन वेदारण्यस्य वैभवात् ।
ज्ञानादपि कृतं नूनं महापातककर्दमम् ॥

नश्यत्येव वदाम्यद्य सत्यं सत्यं तपोधनः ।
तदेवमेतत्कथितं विटङ्कागमकारणम् ॥

भोः भोः तपोधनाः किं वा भूयोपि श्रोतुमिच्छथ ।

॥ इति ब्रह्मकैवर्ते वेदारण्यमाहात्म्ये षष्ठोऽध्यायः ॥

सनत्कुमार :-

नन्दिकेश महाभाग सर्वलोकहिते रत ।
शेषस्य सर्पराजस्य सोमास्कन्द पदाम्बुजे ॥

सायुज्यमिति चैवोक्तं तस्योद्भवमशेषतः ।
वक्तुमर्हसि देवेश द्वितीयः परमेश्वरः ॥

एवमुक्तो मुनीन्द्रेण ध्यात्वा देवं महेश्वरं ।
उक्तवान्सकलं तस्मै देव्यै देवेन भाषितम् ॥

नन्दिकेश्वर :-

आदिसृष्टौ पुरा विष्णुः पुत्रार्थं तप आचरत् ।
विश्वकर्माणमाहूय सोमास्कन्दं महेश्वरम् ॥

निर्माय पूजयित्वा तु पुत्रं लब्ध्वा तु मन्मथम् ।
देवेन्द्रस्य ददौ देवं सोमास्कन्दं महेश्वरम् ॥

सोऽपि संपूज्य देवेशं चिरकालं मुनीश्वराः ।
दानवानां वधार्थाय चानीताय नृपाय च ॥

मुचुकुन्दाय तेनैव दत्तं देवं महेश्वरम् ।
सोपि हृष्टमनाः भूत्वा प्रापयामास वै मुने ।
कमलालयजे क्षेत्रे क्षेत्राणामुत्तमोत्तमे ॥

॥ इति श्रीशैवपुराणे सनत्कुमारसंहितायां नागपट्टणमाहात्म्ये ॥

कालागरुवनमाहात्म्ये -

शौनकः उवाच :-

श्रीमदादिविटङ्कश्च एतत्क्षेत्रमुपागतः ।
इत्युक्तं च त्वया पूर्वं कारणं तत्र किं वद ॥
विटङ्क इति किं नाम देवता तत्र किं वद ॥

सूत उवाच :-

मुचुकुन्दस्य चरितं श्रवणादघनाशनम् ।
वक्ष्येऽहं सङ्ग्रहेणैव सावधानेन तच्छृणु ॥

मुचुकुन्द इति ख्यातः राजास्ति स महाबलः ।
सर्वलोकेषु विख्यातः गुणस्यातिप्रकाशवान् ॥

देवानामसुराणां च भूपानां च तथैव च ।
जेता मन्त्रविदां श्रेष्ठो मन्त्रज्ञो ब्राह्मणप्रियः ॥

शिवभक्तो विशेषेण सर्वदा शिवपूजकः ।
अग्निहोत्रपरो नित्यं नित्यं चातिथिपूजकः ॥

एवंविधगुणो राजा शशास पृथिवीमिमाम् ।
तस्मिन्काले च देवानामसुराणां द्विजोत्तमः ॥

युद्धं तदभवद्ब्रह्मन्केशाकेशि मिथो मिथः ।
इन्द्रस्तदानीं नृपतिं देवेन्द्रो देवनायकः ॥

आनयामास सूनेन देवानां च सहायिनम् ।
आहूतो देवराजेन मुचुकुन्दो महाबलः ॥

कामगं रथमारुह्य देवलोकमवाप्तवान् ।
तदा सम्मानितो राजा देवेन्द्रेण जितश्रमः ॥

देवानां जयकाङ्क्षी च चकार कदनन्तराम् ।
असुरा निर्जितास्तेन दुर्मदया महाबलाः ॥

देवानां च जयः प्राप्तः देवलोकः प्रतिष्ठितः ।
तदा तु प्रीतिदानार्थं किं देयमिति वासवः ॥

विचार्य च तदा प्राह मुचुकुन्दाय देवराट् ।
मुचुकुन्दस्तदा दृष्ट्वा देवं देवेन्द्रपूजितम् ॥

वरयामास दास्यध्वं यदि मे दातुमिच्छथ ।
देवो दानं च कृत्वाथ प्रेषयामास तं नृपम् ॥

तद्वाक्यं च समाकर्ण्य विश्वस्य वचनं तदा ।
अप्राप्तवान् च देशं च कालाकाङ्क्षी नृपोत्तमः ॥

अन्यं कृत्वा देवरूपं देवेन्द्रस्तमचोदयत् ।
स्वाहूतहस्ते दत्वैतत् तद्दृष्ट्वा नृपतिः परम् ॥

इदं न भवतीत्युक्त्वा मुचुकुन्दो व्यसर्जयत् ।
आदितो निर्मितो यस्माद्देवश्चातिविटङ्कः ॥

स्थापितो देवदूतेन काळागरुवनाह्वये ।
अन्यं दत्त्वा उदारं च निर्माय च स वासवः ॥

भूपाय प्रेषयामास एवमाह च तां प्रति ।
ततो विचार्य पश्चात्तु स्वयं निर्माय देवराट् ॥

पुनर्जगाम स्वर्गं च तं दृष्ट्वा वासवोऽपि च ।
आत्मनो देवपूजां च त्यागराज समाह्वयम् ॥

अहमेव त्यागराजः तेन प्रोक्तो महेश्वरः ।
तमानीय च लोकांश्च स्वर्गाद्भक्तिपुरःसरम् ॥

वल्मीकेऽस्थापयत्पश्चात्सन्तोषं परमाप्तवान् ।
तत्रैव पूजाकृत्यानि स्वयमेव तथाऽकरोत् ॥

एतदन्यानि पञ्चासन् विटङ्काख्यानि तानि च ।
अन्येषु स्थानवर्येषु वर्तन्तेऽद्यापि सुज्वलम् ॥

एतदागमनं तस्य विटङ्कस्य महेशतुः ।
कथितं भवता प्रोक्तं सर्वे श्रृण्वन्तु सादरम् ॥

सङ्ग्रहेण मयाख्यातं सर्वलोकोपकारकम् ।
विटङ्कानां च षट्कं च भूवले च प्रतिष्ठितम् ॥

तेषां दर्शनमात्रेण स्वर्गं विन्दति मानवः ।
एवमन्यानि बहुशः सन्ति वै कारणानि च ॥

श्रवणादेव जन्तूनां भोगमोक्षफलप्रदम् ।
अस्य क्षेत्रस्य माहात्म्यं कस्यापि न च विद्यते ॥

महाभिषेककरणैर्महानैवेद्यवन्दनैः ।
प्रदक्षिणनमस्कारैस्स्तोत्रपाठैर्विशेषतः ॥

ये च पूजां कुर्वन्ति कालागरुवनेशतुः ।
तेऽपि सर्वे शिवेनैक्यं लभन्ते मानवोत्तमाः ॥

तत्रत्यतीर्थवर्येषु सर्वपापहरेषु च ।
ये स्नान्ति मानवा लोके काले काले च पावने ।
ते यान्ति शाश्वतं धाम यत्र गत्वा न शोचति ॥

निमिषं निमिषार्धं वा दिनार्धमथवा दिनम् ।
ये वसन्ति नरास्यतत्र ते वै कैलासवासिनः ॥

कन्यादानं च गोदानं वृषोत्सर्जनमेव च ।
वस्त्रं हिरण्यं पयसा सहितं कुम्भमेव च ॥

यो ददाति नरो भक्त्या स याति शिवतुल्यताम् ।
अन्यत्र कोटिदानेन यत्फलं जायते भुवि ॥

तत्फलं ब्रह्मतीर्थस्य तटे च क्षणमात्रतः ।
भविष्यति न सन्देहः सत्यं सत्यं न संशयः ॥

पितृप्रीतिकरं श्राद्धं कालागरुवनान्तरे ।
ये कुर्वन्ति नरा भूमौ पितरो यान्ति शाश्वतम् ॥

उद्यानस्य प्रकर्तारः ये च पानीयदापकाः ।
वस्त्रगन्धप्रदातारः छत्रध्वजपताकदाः ॥

साम्राज्यभाग्यं लब्ध्वाऽन्ते शिवे नीयन्त तत्र च ।
शिवरात्रिव्रतं कृत्वा सोमवारव्रतं तथा ।
भानुवारव्रतं चाऽपि तथा मासो उपवासिनम् ॥

एकैकं कोटिगुणितं फलं भवति निश्चितम् ।
देवस्येशानदिग्भागे यश्च कूपः प्रवर्तते ।
विलं शेषविलं नाम शेषेण च कृतं पुरा ॥

बिलद्वारेण चागत्य प्रत्यहं परिपश्यति ।
रसानि च ददन्नित्यं शिवभक्तो विशेषतः ॥

तत्कूपदर्शनं लोके दुर्लभं मनुजेषु वै ।
तत्तीर्थपानमात्रेण कुष्ठरोगी विमुच्यते ॥

तत्तीरे पिष्टदानं च सघृतं च फलान्वितम् ।
शिवप्रीतिकरं नित्यं शिवलोकप्रदायकम् ॥

तेनैव सहितं यस्तु कुरुते च प्रदक्षिणम् ।
तेन भूः सकला दत्ता फलसस्यसमन्विता ॥

तत्तर्थदर्शनादेव यमलोकं न पश्यति ।
प्रातर्दृष्ट्वा च तत्कूपं रात्रिपापाद्विमुच्यते ॥

सायं दृष्ट्वा दिवापापं तत्क्षणेन विमुच्यते ।
प्रतिमासं सङ्क्रमेषु अमायां पौर्णिमासु च ॥

सोमवारेषु सर्वेषु विशेषात्कार्तिकेषु च ।
प्रदक्षिणत्रयं कृत्वा नत्वा पीत्वा च तज्जलम् ॥

ब्रह्महत्यादिपापैश्च मुच्यते तत्क्षनेन च ।
लिङ्गस्य मूलपर्यन्तं तत्कूपं च प्रवर्तते ॥

शिवस्य बन्धिनी यस्मात्तस्मात्तत्सदृशं न हि ।

यानीह पुण्यानि शिवप्रियाणि
कृतानि नान्येव च तत्र भूमौ ।
क्षणं क्षणार्धं निमिषं तदर्धं
वासं च कृत्वा सुखमेति तीर्थे ॥

तस्मात्तत्कूपतीर्थं च पश्येन्नित्यमतन्द्रितः ।
सर्वसौभाग्यसंपत्तिर्भविष्यति शिवाश्रयात् ॥

॥ इति श्रीशैवपुराणे एकादशरुद्रसंहितायां उपरिभागे क्षेत्रखण्डे कालागरुवनमाहात्म्ये तीर्थावरणं नाम पञ्चपञ्चाशोऽध्यायः ॥

पाद्मेपुराणे मन्त्रसिद्धिक्षेत्रकल्पे -

सूत :-

इत्थं लक्ष्मीस्तपस्तेपे विष्ण्वर्थं मुनिसत्तमाः ।
तस्मात्क्षेत्रवरं पुण्यं तन्नाम्ना प्रथितं भुवि ॥

लक्ष्म्याः घटस्तनपयोवर्धितं विपिनं यतः ।
तस्माल्लक्ष्मीवनं नाम्ना विख्यातं तज्जगत्त्रये ॥

कमलार्थं बृहद्वीचिः बहिर्भूतोऽम्बुदध्वनिः ।
ततो बहिर्बृहत्सिन्धुनाथः संज्ञात विश्रुतः ॥

विवाह मङ्गळं ह्यत्र पुरे श्रीकृष्णयोरभूत् ।
श्रीकृष्णमङ्गलं नाम तस्मादस्य पुरस्य वै ॥

नियतं मङ्गलकरं कृष्णस्यापि महत्पुरम् ।
ततस्तु प्रथितं लोके कृष्णमङ्गळमित्यपि ॥